श्री ऋषभदेवस्वामिने नमः ।

श्री शान्तिनाथाय नमः । श्री नेमिनाथाय नमः ।

श्री शङ्खेश्वरपार्श्वनाथाय नमः । श्री महावीरस्वामिने नमः ।

श्री गौतमस्वामिने नमः । श्री सद्गुरुभ्यो नमः ।।

ॐ श्रीँ ह्रीँ अर्हँ नमः ।

आचार्यभगवत्-कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिप्रणीतं

स्वोपज्ञलघुवृत्तिविभूषितं

# श्रीसिद्धहेमचन्द्रशब्दानुशासनम् ।।

प्रणम्य[1] **परमात्मानं** श्रेयः शब्दानुशासनम् ।
आचार्य**हेमचन्द्रेण** स्मृत्वा किञ्चित् प्रकाश्यते ।।१।।

**अर्हँ ।१।१।१।।**

**अर्हँ**[2] इत्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं मङ्गलार्थं शास्त्रस्याऽऽदौ प्रणिदध्महे ।।१।।

**सिद्धिः स्याद्वादात् ।१।१।२।।**

स्याद्वादाद् अनेकान्तवादात् प्रकृतानां शब्दानां **सिद्धिः** निष्पत्तिर्ज्ञप्तिश्च वेदितव्या ।।२।।

**लोकात् ।१।१।३।।**

अनुक्तानां संज्ञानां न्यायानां च लोकाद् वैयाकरणादेः **सिद्धिर्ज्ञप्तिर्वेदितव्या** , वर्णसमाम्नायस्य च ।।३।। तत्र-

**औदन्ताः स्वराः ।१।१।४।।**

---

१. १।१।१। त आरभ्य ३।२।१५६। पर्यन्तमस्य संशोधने लघुवृत्तेरिमे हस्तलिखितादर्शाः सम्प्रयुक्ताः — पा१,२,३, खं१,२,३, J3 । एषां सर्वेषां स्वरूपं प्रस्तावनातोऽवगन्तव्यम् ।। २. **अर्हमित्ये**° खं१, पा१,J3 ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औकारावसाना वर्णाः स्वरसंज्ञाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥४॥

**एक-द्वि-त्रिमात्रा ह्रस्व-दीर्घ-प्लुताः ।१।१।५॥**

मात्रा कालविशेषः । एक-द्वि-त्र्युच्चारणमात्रा औदन्ता वर्णा यथासंख्यं ह्रस्व-दीर्घ-प्लुतसंज्ञाः स्युः । अ इ उ ऋ ऌ , आ ई ऊ ॠ ॡ , ए ऐ ओ औ , आ ३ ई ३ ऊ ३ इत्यादि ॥५॥

**अनवर्णा नामी ।१।१।६॥**

अवर्णवर्जा औदन्ता वर्णा नामिसंज्ञाः स्युः । इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥६॥

**ॡदन्ताः समानाः ।१।१।७॥**

ॡकारावसाना वर्णाः समानाः स्युः । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ॥७॥

**ए-ऐ-ओ-औ सन्ध्यक्षरम् ।१।१।८॥**

' ए ऐ ओ औ ' इत्येते वर्णाः सन्ध्यक्षराणि स्युः ॥८॥

**अं-अः अनुस्वार-विसर्गौ ।१।१।९॥**

अकारावुच्चारणार्थौ । ' अं ' इति नासिक्यो वर्णः ' अः ' इति च कण्ठ्यः यथासंख्यम् ' अनुस्वार-विसर्गौ ' स्याताम् ॥९॥

**कादिर्व्यञ्जनम् ।१।१।१०॥**

कादिर्वर्णो हपर्यन्तो व्यञ्जनं स्यात् । क ख ग घ ङ , च छ ज झ ञ , ट ठ ड ढ ण , त थ द ध न , प फ ब भ म , य र ल व , श ष स ह ॥१०॥

**अपञ्चमान्तस्थो धुट् ।१।१।११॥**

वर्गपञ्चमा-ऽन्तस्थावर्जः कादिर्वर्णो धुट् स्यात् । क ख ग घ , च छ ज झ , ट ठ ड ढ , त थ द ध , प फ ब भ , श ष स ह ॥११॥

**पञ्चको वर्गः ।१।१।१२॥**

कादिषु वर्णेषु यो यः पञ्चसंख्यापरिमाणो वर्गः स स वर्गः स्यात् । क ख ग घ ङ , च छ ज झ ञ , ट ठ ड ढ ण , त थ द ध न , प फ ब

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ म ॥१२॥

## आद्य-द्वितीय-श-ष-सा अघोषाः ।१।१।१३॥

वर्गाणामाद्य-द्वितीया वर्णाः श-ष-साश्च अघोषाः स्युः । क ख , च छ , ट ठ , त थ , प फ , श ष स ॥१३॥

## अन्यो घोषवान् ।१।१।१४॥

अघोषेभ्योऽन्यः कादिर्वर्णो घोषवान् स्यात् । ग घ ङ , ज झ ञ , ड ढ ण , द ध न , ब भ म , य र ल व , ह ॥१४॥

## य-र-ल-वा अन्तस्थाः ।१।१।१५॥

एते ' अन्तस्थाः ' स्युः ॥१५॥

## अं-अः-ॅक-ॅप-श-ष-साः शिट् ।१।१।१६॥

अ-क-पा उच्चारणार्थाः , अनुस्वार-विसर्गौ वज्र-गजकुम्भाऽऽकृती च वर्णौ श-ष-साश्च शिटः स्युः ॥१६॥

## तुल्यस्थाना-ऽऽस्यप्रयत्नः स्वः ।१।१।१७॥

स्थानं[1] कण्ठादि । आस्ये प्रयत्न आस्यप्रयत्नः स्पृष्टतादिः । **तुल्यौ** वर्णान्तरेण सदृशौ स्थाना-ऽऽस्यप्रयत्नौ यस्य स वर्णस्तं प्रति स्वः स्यात् ।

तत्र त्रयोऽकारा उदात्ता-ऽनुदात्त-स्वरिताः प्रत्येकं सानुनासिक-निरनुनासिक-भेदात् षट् , एवं दीर्घ-प्लुतौ इति अष्टादश भेदा अवर्णस्य , ते सर्वे कण्ठस्थाना विवृतकरणाः परस्परं स्वाः । एवम् इवर्णास्तावन्तस्तालव्या विवृतकरणाः स्वाः । उवर्णा ओष्ठ्या विवृतकरणाः स्वाः । ऋवर्णा मूर्द्धन्या विवृतकरणाः स्वाः । ऌवर्णा दन्त्या विवृतकरणाः स्वाः । सन्ध्यक्षराणां ह्रस्वा न सन्ति , इति तानि प्रत्येकं द्वादशभेदानि । तत्र एकारास्तालव्या विवृततराः स्वाः । ऐकारास्तालव्या अतिविवृततराः स्वाः । ओकारा ओष्ठ्या विवृततराः स्वाः । औकारा ओष्ठ्या अतिविवृततराः स्वाः । वर्ग्याः पञ्च पञ्च परस्परं स्वाः । य-ल-वाना-मनुनासिकोऽननुनासिकश्च द्वौ भेदौ परस्परं स्वौ ॥१७॥

---

१. "स्थानं कण्ठादि । यदाहुः — "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च ॥" [पाणिनीयशिक्षा , श्लो० ८] इति बृहद्वृत्तौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org